International Journal of Sanskrit Research 2021; 7(5): 274-277

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 274-277
© 2021 IJSR
www.anantaajournal.com
Received: 20-07-2021
Accepted: 24-08-2021

**Dr. G Sireesha**
Associate Professor, Department of Sanskrit, Sri Venkateswara University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. G Sireesha**
Associate Professor, Department of Sanskrit, Sri Venkateswara University, Tirupati, Andhra Pradesh, India

# ध्वनेः लक्षणायाम् अलङ्कारान्तर्भावनिराकरणम्

**Dr. G Sireesha**

## प्रस्तावना

शब्दार्थयोः स्म्बन्धे शब्दः, व्यापारः, अर्थ इति त्रयोऽशाः अपेक्षिताः भवन्ति। तेषु शब्दः वाचकलक्षकव्यञ्जकभेदेन त्रिधा भवति। व्यापारस्तु अभिधा – लक्षणा - व्यञ्जना इति त्रिधा। अर्थस्तु वाच्य – व्यङ्ग्यरूपः भवति। एवं स्थिते प्रसिद्धे शब्दार्थसम्बन्धे केचन आचार्याः वाच्चार्थात् द्वितीयम् असहिष्णवः इतरदर्थद्वयं निराकृतवन्तः। केचन पुनः लक्षणावृत्तिमङ्गीकृत्य व्यञ्जनावृत्ति निराकृतवन्तः। तत्र मीमांसकानां मते वाच्य एव अर्थः। प्राचीन नैयायिकमते लक्ष्यार्थोऽपि स्वीकृतः। वैयाकरणानां मते स्फोटरूपः तृतीयः वाच्यात् भिन्नः व्यङ्ग्योऽर्थः प्रसिद्धः। एवं स्थितेषु मतभेदेषु ध्वनेः पृथक् प्रसिद्धिं साधयितुम् इतराभ्यः तात्पर्यादि वृत्तिभ्यः तस्य वैशिष्ट्यम् उपपादयितुम् आनन्दवर्धनेन ध्वन्यालोकः विरचितः। ध्वन्यालोके ध्वनिस्थापनार्थं प्रथमं प्रत्याख्यार्थं त्रयः अभाववादाः एवं प्रतिपादिताः –

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः
तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
केचिद्वाच्यां स्थितमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्।।[1]

एतेषामभाववादानां साररूपोऽर्थः लोचनकारेण अभिनवगुप्तेन सम्यगेवं निरूपितः – तत्राभावविकल्पस्य त्रयः प्रकाराः –

1) शब्दार्थ – गुणालङ्काराणामेव शब्दार्थशोभाकारित्वात् लोकशास्त्रातिरिक्तसुन्दर-शब्दार्थरूपस्य काव्यस्य न शोभाहेतुः कश्चिदन्योऽस्ति योऽस्माभिर्न गणित इत्येकः प्रकारः।

[1]. ध्वन्यालोकः – प्रथमोद्योतः – श्लोकः - 1

2) यो वा न गणितः स शोभाकार्येव न भवतीति द्वितीयः।
3) अथ शोभाकारो भवति तर्हि अस्मदुक्त एव गुणे वा अलङ्कारे वा अन्तर्भवति, नामान्तरकरणे तु कियदिदं पाण्डित्यम्? अथाप्युक्तेषु गुणेष्वलङ्कारेषु वा नान्तर्भावः, तथापि किञ्चिद्विशेषलेशमाश्रित्य, नामान्तरकरणमुपमाविच्छित्ति-प्रकाराणामसंख्यत्वम्। तथापि गुणालङ्कारव्यतिरिक्तत्वाभाव एव। तावन्मात्रेण च किं कृतम्? अन्यस्यापि वैचित्र्यस्य शक्योत्प्रेक्ष्यत्वात्। चिरन्तनैः भरतमुनि-प्रभृतिभिः यमकोपमे एव शब्दार्थालङ्कारत्वेनेष्टे। तत्प्रपञ्च्य दिक्प्रदर्शनं त्वन्यैरालङ्कारिकैः कृतम्। तद्यथा "कर्मण्यण्" इत्यत्र कुम्भकाराद्युदाहरणं श्रुत्वा स्वयं नगरकारादिशब्दा उत्प्रेक्ष्यन्ते। तावता क आत्मनि बहुमानः? एवं प्रकृतेऽपीति तृतीयः प्रकारः। एवमेकस्त्रिधा विकल्पः, अन्यौ च द्वाविति पञ्च विकल्पाः इति तात्पर्यार्थः।

तत्र प्रथम – अभाववादिनां मते सर्वथा वाच्यात् भिन्नत्वं नाङ्गीकृतम्। अमुख्यवृत्त्या स्वीकृतवतां मते वाच्यात् भिन्नत्वमभ्युपगतम्। तृतीयाः शालीनतावादिनः वाच्यात् भिन्नत्वमङ्गीकुर्वन्तोऽपि तत्स्वरूपं प्रतिपादयितुं न शक्नुवन्ति। शालीनतावादिनस्तु एवं परिहसितः अभिनवगुप्ताचार्यैः – यथा कुमार्यः भर्तुसुखमङ्गीकुर्वते, परन्तु सुखस्वरूपं वक्तुं न पारयन्ति। अतः वादत्रयस्य उत्तरोत्तरं ध्वन्यपेक्षया दौर्बल्यम् सिद्धम्।

ध्वनेः लक्षणायाम् अन्तर्भावत्वनिराकरम् –

आनन्दवर्धनः ध्वन्यालोके प्रथमोद्योते ध्वन्यभाववादिनां मतत्रयं निरूपितवान्। अभाववादिषु अन्यतमः ध्वनेः वाच्यात् भिन्नत्वमङ्गीकुर्वन्नपि ध्वनिः लक्षणाव्यापारे अन्तर्भवतीति उक्तवान्। यद्यपि कण्ठोक्त्या वाच्यत्वेन ध्वनिशब्दं उक्त्वा गुणवृत्तिः ध्वनिरूप इति न प्रतिपादितः तथापि लक्षणावृत्तेः उदाहरणानि ध्वनियोग्यानि अभाववादिना प्रतिपादितानि। एतत् स्वयम् आनन्दवर्धनः एवं प्रतिपादयति – यद्यपि ध्वनिशब्दसङ्कीर्तनेन काव्यलक्षणा-विधायिभिः गुणवृत्तिरित्यन्यो वा न कश्चित्प्रकारः प्रकाशितः तथापि अमुख्यवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गः मनाक् स्पृष्टोऽपि न लक्षित इति परिकल्प्य एवमुक्तम् – "भाक्तमाहुस्तमन्ये" इति। लोचनकृता अस्यार्थः एवं विवृतः। भामहादिभिः उद्भटेन, वामनेन च ध्वनिदिक् उदाहृता। शब्दानाम् अभिधाव्यापारो मुख्यः गुणवृत्तिश्च इति। वामनोऽपि सादृश्याल्लक्षणा वक्रोक्तिः इत्युवाच। तेषां ध्वनिव्यतिरेकवादिनां मतं सङ्क्षिपता आनन्दवर्धनेन एवमुदाहृतम्। भाक्तवादं निराकर्तुं प्रथमं गुणवृत्तेरेव लक्षणं ज्ञातव्यम्। भज्यते मुख्यार्थबाधायामिति भक्तिः। तस्याः हृदयं भाक्तम्। भक्तिः, गुणवृत्तिः, लक्षणा, उपचारः इत्येवमादयः शब्दाः लक्षणापर्यायाः अलङ्कारशास्त्रे दृश्यन्ते – लक्षणायाः लक्षणं यथा –

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।[2]

लक्षणा तावत् पञ्चविधा भवति। 1) अभिधेयेन सम्बन्धात् 2) सामीप्यात् 3) समवायतः 4) वैपरीत्यात् 5) क्रियायोगात् लक्षणा पञ्चधा मता।

1) अभिधेयेन संयोगात् द्विरेफशब्दस्य हि योऽभिधेयो भ्रमरशब्दः द्वौ रेफौ यस्येति कृत्वा, तेन भ्रमरशब्देन यस्य संयोगः सम्बन्धः षट्पटलक्षणस्यार्थस्य, सोऽर्थो द्विरेफशब्देन लक्ष्यते। अभिधेयसम्बन्धं व्याख्यातरूपं निमितीकृत्य।
2) समीप्यात् गङ्गायां घोषः।
3) समवायादिति सम्बन्धादित्यर्थः, यष्टीः प्रवेशय इति यथा।
4) वैपरीत्यात् यथा शत्रुमुद्दिश्य कश्चिद् ब्रवीति – किमिवोपकृतं न तेन मम इति।
5) क्रियायोगादिति कार्यकारणभावादित्यर्थः। यथा – अन्नापहरिणि व्यवहारः प्राणानय हरति इति।

[2]. काव्यप्रकाशः – द्वितीयोल्लासः – सूत्रम् - 12

एवमनया लक्षणया पञ्चविधया विश्वमेव व्याप्तम्।

लक्षणाभेदेषु गौणी लक्षणा सादृश्यमूला शुद्धात् सम्बन्धान्तर जन्या। प्रयोजन लक्षणायां जहल्लक्षणा अजहल्लक्षणा इति भेदद्वयस्यैव ध्वनेः सहकारकारित्वं "गङ्गायां घोषः" इत्यादि प्रयोजनलक्षणाव्यवहारे तीरवृत्तिर्घोषः इत्यर्थावगमने लक्षणव्यापारस्य कार्यसमाप्तिः। शीतत्वपावनत्वादि धर्मस्तु व्यञ्जनाव्यापारगम्य एव। तदेवोक्तम् –

मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।
यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः।।[3]

मुख्यां वृत्तिमभिधाव्यापारं परित्यज्य परिसमाप्य गुणवृत्त्या लक्षणरूपयाऽर्थस्यामुख्यस्य दर्शनं प्रत्यायना, सा यत्फलं कर्मभूतं प्रयोजन-मुद्दिश्य क्रियते, तत्र प्रयोजने तावत् द्वितीयो व्यापारः। न चासौ लक्षणैव, यतः स्खलन्ती बाधकव्यापारेण विधुरीक्रियमाणा गतिरवबोधनशक्तिर्यस्य शब्दस्य तदीयो व्यापारो लक्षणा। न च प्रयोजनमवगमयतः शब्दस्य बाधकयोगः। तथाभवते तत्रापि निमित्तान्तरस्य प्रयोजनान्तरस्य चान्वेषणेनावस्थानात्। तेनायं लक्षणाया न विषय इति भावः। अपि च लक्षणया ध्वनेः स्वीकारे अतिव्याप्तिः, अव्याप्तिश्च भवत्येव। अतः –

भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथव्याप्तेर्न चासौ लक्ष्यते तथा।।[4]

यत्रापि व्यङ्ग्यकृतं महत्सौष्ठवं नास्ति तत्राप्युपचरितशब्दवृत्त्या प्रसिद्धानुरोधप्रवर्तितव्यवहारः कवयो दृश्यन्ते। तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः। अव्यप्तिरप्यस्य लक्षणस्य नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्य-लक्षणः अन्ये च बहवः प्रकाराः भक्त्या व्याप्यन्ते। तस्माद् भक्तिरलक्षणम्।

ध्वनेः अलङ्कारान्तर्भावनिराकरणम् -

आनन्दवर्धनाचार्येण ध्वन्यालोके ध्वन्यभाववादीनाम् अभिप्रायः विस्तरेण अनूद्य खण्डितः। अलङ्कारेषु ध्वनेरन्तर्भावः इति पक्षः उद्भटादीन् मनसि कृत्वा आनन्दवर्धनेन पूर्वोक्तरीत्या त्रिधा निरूपितः। अलङ्कारेषु ध्वनेरन्तर्भावः इति पक्षः आनन्दवर्धनेन एवमनूदितः पुनरपरे तस्याभावमन्यथा कथयेयुः – न सम्भवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकमनतिवर्तमानस्य तस्योक्तिष्वेव चारुत्वहेतुष्वन्तर्भावात्। तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्रकरणे यत्किञ्चन कथनं स्यात्। ततः तमेव विपक्षिणाम् अभिप्रायं खण्डयितुमुपक्रमते।

यदप्युक्तम् – कामनीयकमनतिवर्तमानस्य तस्योक्तालङ्कारादिषु एवान्तर्भावः इति, तदप्यसमीचीनम्, वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्य-व्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः? वाच्यवचकचारुत्वहेतवे हि तस्याङ्गभूताः, स त्वङ्गिरूप एवेति प्रतिपादयिष्यमाणत्वात्। परिकरश्लोक-श्चात्र –

व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।
वाच्यवाचकचारुत्वहेत्वन्तः पातिता कुतः।।[5]

अथ विस्तरेण अलङ्कारेषु ध्वनेरन्तर्भावनिरासः प्रतमोद्योते ध्वनिकृता कृतः। ननु यत्र प्रतीयमानस्यार्थस्य वैशद्येनाप्रतीतिः स नाम मा भूद् ध्वनेर्विषयः। यत्र तु प्रतीतिरस्ति, यथा समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्ति-पर्यायोक्तापह्नुति दीपक सङ्करालङ्कारादौ, तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्तुभिहितम् – उपसर्जनीकृतस्वार्थौ इति। अर्थो गुणीकृतात्मा गुणीकृताभिधेयः शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स

3. ध्वन्यालोकः – प्रथमोद्योतः – श्लो - 17
4. ध्वन्यालोकः – प्रथमोद्योतः – श्लो - 14
5. ध्वन्यालोकः – चतुर्थोद्योतः – श्लो - 5

ध्वनिरिति। तेषु कथं तस्यान्तर्भावः, व्यङ्ग्यप्राधान्ये हि ध्वनिः। न चैतत्समासोक्त्यादिष्वस्ति यथा –

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्।।[6]

इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन पर्यायतः समारोपितः। नायिकानायकव्यवहारयोः निशाशशिनोरेव वाक्यार्थत्वात्। आक्षेपेऽपि व्यङ्ग्य-विशेषाधिक्षेपिणोऽपि वाच्यस्यैव प्राधान्येन वाक्यार्थ आक्षेपोक्ति सामर्थ्यादेवं जायते। तथाहि – तत्र शब्दोपारूढो विशेषाभिधानेच्छाया प्रतिषेधरूपो य आक्षेपः स एव व्यङ्ग्यविशेषमाक्षिपन् मुख्यं काव्यशरीरम्।

उपसंहारः –

आनन्दवर्धनाचार्येण ध्वन्यालोके ध्वनेः लक्षणं, काव्यस्यात्माविषये सम्यक् विवेच्य ध्वनेः लक्षणायाम् वा अलङ्कारेषु वा अन्तर्भावत्वं निराकृतम् वर्तते।

आधारग्रन्थसूची -

1. ध्वन्यालोकः – आनन्दवर्धनः, काशीसंस्कृतसिरीज् ग्रन्थ माला, बनारस्, 1917.
2. काव्यप्रकाशः – मम्मटाचार्यः, साहित्य भण्डार्, मेरठ, 1970.

6. ध्वन्यालोकः – प्रथमोद्योतः – पृ. 11